दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः उत्तरायणः श्रावणकृष्णाषष्ठी
श्रावण 01 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-258 | 1 | जुलाई 16 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**2** षोडशतमवित्तायोगस्य अध्यक्षेण मिलितवान् मुख्यमंत्री सुक्खुः राजस्व-हानि-अनुदानं निरन्तरं कर्तुं प्रार्थितवान्

**3** सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं विकसितराष्ट्रस्य लक्ष्यं प्राप्तुं, राष्ट्रनिर्माणे च शिक्षायाः महती भूमिका भविष्यति - राष्ट्रपति

**4** उत्तराखण्डराज्यस्य सन्दर्भे हरेला (पर्यावरणसंक्षणपर्व) महोत्सवस्य (संक्रान्तिः) आगमनेनेव पवित्र-श्रावणमासस्य अपि आरम्भः भवति।

## अष्टादश-दिवसानाम् ऐतिहासिकाभियानस्यानन्तरं सुरक्षितरूपेण पृथ्वीं प्रत्यागतवान् Axiom-4 इति अभियानस्य चालकदलम्





**हिमसंस्कृतवार्ताः -** भारतीयांतरिक्ष-यात्री शुभांशु-शुक्ला Axiom-4 इति अभियानस्य चालकदलस्य अन्ये त्रयः सदस्याः अन्तराष्ट्रिय-अंतरिक्ष-स्थानात् स्वकीयस्य अष्टादश-दिवसानाम् ऐतिहासिकाभियानस्यानन्तरं सुरक्षितरूपेण पृथ्वीं प्रत्यागतवन्तः सन्ति। अन्तर्राष्ट्रीय-अन्तरिक्ष-स्थानके १८ दिवसीयं कार्यं कृत्वा अन्तरिक्षयात्रिणः अमेरिका-देशस्य कैलिफोर्निया-तटे अवतरितवन्तः। जितेन्द्रसिंहमहोदयः अवदत् यत् आगामि एकसप्ताहं यावत् सर्वे अन्तरिक्षयात्रिणः क्वारेन्टाइन मध्ये एव तिष्ठन्ति। सः अवदत् यत् शुभांशु-शुक्ला अगस्तमासस्य १७ दिनाङ्के स्वदेशं प्रत्यागमिष्यति इति अपेक्षा अस्ति। चालकदलम् अधुना पृथ्व्याः गुरुत्वाकर्षणं समायोजितं कर्तुं सप्त-दिवसानां पुनर्वासकार्यक्रमे भागं ग्रहीष्यति । दलनायकः शुक्लावर्यः अन्तराष्ट्रिय-अंतरिक्ष-स्थानस्य यात्रां कुर्वाणः प्रथमभारतीयः अपि च दलनायकस्य राकेश-शर्मणः अनन्तरं द्वितीयः भारतीयांतरिक्षयात्री वर्तते, यः चतुरशीत्यधिक नवदश-शततमाब्दे अंतरिक्षम् अगच्छत् । अन्तराष्ट्रिय-अंतरिक्ष-स्थानके स्वकीयस्य प्रवासावधौ, श्रीशुक्लावर्यः भारतसम्बद्धान् सप्त-विशिष्टान् सूक्ष्म-गुरुत्वाकर्षण-प्रयोगान् अकरोत्। एताः प्रयोगाः भविष्यत्कालीनस्य ग्रहाणामभियानाय दीर्घावधिसम्बद्धाय अंतरिक्षनिवासाय महत्वपूर्ण सूचनाः समुपलब्धं कारयितुं कृताः सन्ति । रविवासरे, नासायाः अभियानदलेन Axiom-4 इत्यस्य चालकदलाय कस्य पारंपरिक समारोहस्य आयोजनं कृतम् अस्ति । समारोहे कथयन्, श्री-शुक्लावर्यः स्वकीयान्तरिक्षयात्रां वास्तविकरूपेण अविश्वसनीयम् अकथयत् । आकाश-गंगा-नामकं अभियानमिदम् एक्सिओम स्पेस्, अमेरिकायाः अंतरिक्ष संस्थानं नासा, भारतीयांतरिक्षानुसंधानसंघ इत्येतेषां मध्ये सहयोगि-प्रयासः वर्तते । प्रधानमंत्री नरेन्द्रमोदी अंतरिक्षे ऐतिहासिकाभियानात् पृथ्वीं प्रत्यागतस्य दलनायकस्य शुक्लावर्यस्य स्वागतसत्कारं कर्तुं राष्ट्रेण सह सम्मिलितः अभवत् । प्रधानमंत्रिणा सार्वजनिक-संदेशपटले भारतीय-अंतरिक्ष यात्रिणः सुरक्षित-प्रत्यावर्तनस्य प्रशंसा कृता अस्ति । श्रीमोदीवर्यः प्रोक्तवान् यत् अन्तार्राष्ट्रिय अंतरिक्ष-स्थानस्य यात्रां कुर्वता प्रथमभारतीयान्तरिक्षियात्रिणः रूपेण दलनायकेन-शुक्लावर्येण स्वकीय-समर्पणेन, साहसेन, अग्रणी-भावनया च अर्बुद-स्वप्नान् प्रेरितम् अकरोत् । सः प्रोक्तवान् यत्, एषा यात्रा देशस्य मानवांतरिक्ष-यात्राभियानस्य गगनयान इत्यस्य उपलब्धिं प्रति गन्तुं सफलप्रयासः अस्ति। केंद्रीय-विज्ञान-प्रौद्योगिकी मंत्री डॉ. जितेंद्र सिंहः अस्मिन् अवसरे भारतीय-वायु-सेना-समूहस्य दलनायकाय शुभांशुवर्याय, Axiom-4 इत्यभियानस्य दलाय च वर्धापनम् अयच्छत् । डॉ. सिंहः प्रोक्तवान् यत् भारतेन अद्य अंतरिक्षे वास्तविकरूपेण स्थायि-स्थानम् अधिगतम् अस्ति। सः प्रोक्तवान् यत्, भारताय एतत् गौरवास्पदं क्षणम् अस्ति यतः हि तस्य प्रतिभासम्पनानां पुत्राणाम् एकः सफलयात्रातः प्रत्यागच्छत् । मंत्रिवर्यः प्रोक्तवान् यत् सर्वे अन्तरिक्ष यात्रिणः सप्ताह यावत् पुनर्वास कार्यक्रमे स्थास्यन्ति। सः प्रोक्तवान् यत् सः AXIOM-4, NASA, SPACEX इत्येतेषां प्रतिनिधिभिः सह पृथक् रूपेण चर्चा विधास्यति । श्री-सिंहः अकथयत् यत् शुभांशु-शुक्ला अगस्तमासस्य सप्तदशदिनाङ्क यावत् भारतम् आगमिष्यन्ति इति अनुमानम् अस्ति । राष्ट्रपतिः द्रौपदीमुर्मुवर्या शुभांशुवर्याय अन्येभ्यः चालकदलस्य सदस्येभ्यः च कुशलप्रत्यागमनाय वर्धापनम् अयच्छत् ।

## शंघाई-सहयोग-संघटनेन आतङ्कवादस्यस्य, पृथकतावादस्य, उग्रवादस्य च विषयेषु सन्धिरहिता स्थितिः स्वीकरणीया - विदेशमन्त्री डा. एस. जयशङ्करः



हिमसंस्कृतवार्ताः - विदेशमन्त्री डॉ. जयशंकरः बीजिंगनगरे शङ्घाई-सहयोग-सङ्गठनस्य सदस्यैः सह चीनदेशस्य राष्ट्रपतिः शी जिनपिङ्ग इत्यनेन सहापि मिलितवान्। डॉ. जयशंकरः अवदत् यत् सः चीनस्य राष्ट्रपतिं भारत-चीनदेशयोः द्विपक्षीयसम्बन्धेषु अद्यतन-स्थितीनां विषये अकथयत् । विदेशमन्त्री डा. जयशङ्करः उक्तवान् यत्- शंघाई-सहयोग-सघटनेन आतङ्कवादस्यस्य, पृथकतावादस्य, उग्रवादस्य च विषयेषु सन्धिरहिता स्थितिः स्वीकरणीया। डा. जयशङ्करः चीनदेशस्य शंघाई-सहयोग-संघटनम् इत्यस्य विदेशमन्त्रिणां उपवेशने भागम् अभजत्। पहलगाम्-नगरे आतङ्क्याक्रमणस्य उल्लेखं कुर्वन् मन्त्रिवर्यः अवदत् यत्, धार्मिकविभाजनं विधातुं जम्मू-कश्मीर्-राज्यस्य पर्यटन-अर्थव्यवस्थां दुर्बलं च कर्तुं एतत् कुकृत्यं विहितम् अस्ति। सः अवदत् यत् संयुक्तराष्ट्रसङ्घस्य सुरक्षा-परिषत् घटनायाः निन्दाम् अकरोत् । सहेव एतादृशस्य आतङ्कवादस्य अपराधीनां, आयोजकानां, वित्तदातृणां, प्रायोजकानां च उत्तरदायित्वं रेखांकितम् अकरोत् । अन्ताराष्ट्रिय-व्यवस्थायां वर्तमान-अव्यवस्थां प्रकाशयन् डा. जयशङ्करः अवदत् यत्, आर्थिक अस्थिरता वर्धमाना अस्ति। सः अवदत् यत्, भारतम् शंघाई-सहयोग-सघटनम् मध्ये स्टार्टअप-नवोन्मेष-पारम्परिक औषध-सार्वजनिक-आधारिक संरचना-पर्यन्तान् अनेकान् उपक्रमान् अकरोत् । सः अकथयत् यत् शंघाई-सहयोग-संघटनस्य सदस्यदेशानां मध्ये सहयोगं प्रगाढं कर्तुम् अधिकव्यापारस्य निवेशस्य, विनिमयस्य च आवश्यकता वर्तते

## सुभाषितम्

**शतं विहाय भोक्तव्यं,**
**सहस्रं स्नानमाचरेत्।**
**लक्षं विहाय दातव्यं,**
**कोटिं त्यक्त्वा हरिं भजेत्।।**

अर्थात्- सौ कार्य छोड़कर भोजन करना चाहिए। हजारों कार्य छोड़कर स्नान करना चाहिए। लाखों कार्य छोड़कर दान देना चाहिए और करोड़ों कार्य छोड़कर परमात्मा की स्तुति करनी चाहिए।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## भारतस्य स्वच्छ-ऊर्जा परिवर्तनं केवलं पर्यावरणम् उद्दिश्य नास्ति अपितु तत् राष्ट्रियाभियानम् अस्ति - प्रल्हाद-जोशी

हिमसंस्कृतवार्ताः - केन्द्रीय-नवीन-नवीकरणीय ऊर्जा-मन्त्रिणा प्रल्हाद-जोशिना पुनः पुष्टिः कृता यत् भारतस्य स्वच्छ-ऊर्जा परिवर्तनं केवलं पर्यावरणम् उद्दिश्य नास्ति अपितु तत् राष्ट्रियाभियानम् अस्ति। सः गतदिवसे IIT मुम्बई इत्यत्र पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य IVCA इति नवीकरणीय-ऊर्जा-शिखरसम्मेलने प्रवदन् आसीत्। केन्द्रीयमन्त्री घोषितवान् यत् विंशति-राज्यमन्त्रिणां अनुरोधेषु केन्द्रसर्वकारः शीघ्रमेव पी-कुसुम-योजनायाः द्वितीयसंस्करणस्य आरम्भं करिष्यति।

# षोडशतमवित्तायोगस्य अध्यक्षेण मिलितवान् मुख्यमंत्री सुक्खुः राजस्व-हानि-अनुदानं निरन्तरं कर्तुं प्रार्थितवान्



**हिमसंस्कृतवार्ताः - नवदेहली।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः स्वीये नवदेहली प्रवासे मंगलवासरे नवीदिल्लीनगरे १६ तमस्य वित्तायोगस्य अध्यक्षं डॉ. अरविन्दपनागढ़ियां मिलित्वा हिमाचलप्रदेशस्य आर्थिकस्थितेः सुदृढीकरणे वित्त-आयोगस्य सहकार्यस्य आग्रहं कृतवान्। सः अवदत् यत् राज्यसर्वकारः वित्तीय-अनुशासनं सुदृढं कर्तुं यथाशक्ति प्रयत्नः कुर्वन् अस्ति। हिमाचलप्रदेशः स्थायिविकासलक्ष्यसहितविविधमापदण्डेषु सर्वोत्तमप्रदर्शनयुक्तेषु राज्येषु अन्यतमः अस्ति । राज्यस्य आर्थिकस्थितिं मनसि कृत्वा सः आयोगं राज्यस्य हिताय अनुशंसां कर्तुं प्रार्थितवान् ।
मुख्यमन्त्री उक्तवान् यत् पर्वतराज्येषु व्ययः अन्यराज्येभ्यः बहुगुणः अधिकः भवति। अतः पर्वतराज्येषु जनसंख्यायाः अनुपातेन न्यूनातिन्यूनं द्विगुणं भागं प्राप्तव्यम् । सः आयोगात् आग्रहं कृतवान् यत् राज्यस्य भौगोलिकस्थितिं सीमितराजस्वसम्पदां च मनसि कृत्वा राजस्व-हानि-अनुदानं निरन्तरं कुर्वन्तु। सः अवदत् यत् १५ तमेन वित्तायोगेन राजस्व-हानि-अनुदानस्य महती न्यूनता कृता यस्य कारणेन राज्यं वित्तीयसंकटस्य सम्मुखीकरणं कुर्वन् अस्ति।
मुख्यमंत्री सुक्खुः पर्वतराज्यानां वार्षिकबजटे हरितनिधेः पृथक् प्रावधानं कर्तुं अनुरोधं कृतवान्। सः अवदत् यत् प्रधानमन्त्रिणा सह अपि अस्य विषयस्य चर्चा कृता अस्ति। मुख्यमन्त्री राज्यसर्वकारेण आपदाप्रबन्धनं, ऋणमुक्तिः, स्थानीयसंस्थाभ्यः अनुदानं, राज्याय विशेषानुदानं च इति विषये दत्तानां परामर्शानां विषये अपि डॉ. पनागढ़ियां ज्ञापयित्वा एतान् परामर्शान् स्वीकर्तुम् आग्रहं कृतवान्। डॉ. पनागढ़िया मुख्यमन्त्रिणं केन्द्रतः सर्वं सम्भवं समर्थनं दास्यति इति आश्वासनं दत्तवान्। मुख्यमन्त्रिणा सह मुख्यसचिवः प्रबोध सक्सेना, मुख्यमन्त्रिणः प्रधानपरामर्शकः रामसुभागसिंहः अपि उपस्थितौ आस्ताम्

# हिमाचले नूतनपंचायतानां निर्माणं न भविष्यति- अनिरुद्धसिंहः



**हिमसंस्कृतवार्ताः - शिमला।** पंचायतीराजमन्त्री अनिरुद्धसिंहः स्पष्टीकृतवान् यत् सम्प्रति राज्ये नवीनपञ्चायतानां निर्माणं न भविष्यति। सः अवदत् यत् ७५० नूतनानां पंचायतानां निर्माणार्थं सर्वकारेण प्रस्तावाः प्राप्ताः, परन्तु राज्यस्य वर्तमानवित्तीयस्थितिं दृष्ट्वा अस्मिन् विषये अग्रे गन्तुं न शक्यते।
मन्त्री उक्तवान् यत् पंचायतस्य कृते वार्षिकं १० लक्षरूप्यकाणां व्ययः भवति, पंचायतभवनस्य निर्माणे तु १.१४ कोटिरूप्यकाणां यावत् व्ययः भवति। एतादृश्यां परिस्थितौ दिसम्बरमासे समाप्तं पंचायतीराजप्रतिनिधिनां कार्यकालं मनसि कृत्वा निर्वाचनप्रक्रियायाः सज्जतां सर्वकारेण आरब्धा। सः अवदत् यत् येषु पंचायतेषु भवनानि नास्ति तेषु भवननिर्माणकार्यं प्रचलति, विकासकार्यार्थं धनस्य अभावः नास्ति।

## एनएच-निर्माणस्य कारणेन हानिः न सह्यते : अनिरुद्धसिंहः

पंचायतीराजमन्त्री अनिरुद्धसिंहः उक्तवान् यत् राष्ट्रियराजमार्गस्य निर्माणकाले गृहाणां क्षतिः न सह्यते। सः अवदत् यत् प्रतिदिनं एतादृशाः उपालम्भाः प्राप्यन्ते। अस्य विषयस्य विषये केन्द्रीयमार्ग-परिवहनमन्त्री नितिनगडकरी इत्यनेन सह समागमः भविष्यति इति मन्त्री अवदत्। अपि च सांसदः अनुरागठाकुरः अपि अस्य विषयस्य संज्ञानं गृहीतवान् अस्ति।

# प्रदेशे अधिकाधिक-रज्जूमार्गाणां स्वीकृतिः भवेत्- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अद्यत्वे देहलीप्रवासे अस्ति। तत्र च केन्द्रीयमन्त्रिभिः प्रदेशस्य आपद्विषये सूचयति तथा च महत्त्वपूर्णान् विषयान् उपस्थापयति। अस्मिन्नैव क्रमे मुख्यमंत्री मंगलवासरे नवीदिल्लीनगरे केन्द्रीयमार्गराजमार्गमन्त्री नितिनगडकरी इत्यनेन सह मिलित्वा हिमाचलप्रदेशे जलप्रलयेन भूस्खलनेन च महतीं हानिः इति सूचितवान्। क्षतिग्रस्तमार्गाणां पुनर्स्थापनायै पुनर्निर्माणं च कार्येषु सहकार्यं कृत्वा राज्यस्य केषुचित् मार्गेषु प्रधानमन्त्री गतिशक्तियोजनायां समावेशः करणीयः इति आग्रहं कृतवान्। मुख्यमंत्री सुक्खुः अपि केन्द्रीयमन्त्रिणं राष्ट्रियराजमार्गपरियोजनासु विविधकारणात् विलम्बस्य विषये सूचितवान् तथा च एतासां परियोजनानां सर्वाः औपचारिकताः सम्पन्नं कर्तुम् आग्रहं कृतवान् येन शीघ्रमेव निर्माणकार्यं आरभ्यत इति। मुख्यमन्त्री राष्ट्रियराजमार्गपरियोजनासु आन्तर्भौममार्गस्य निर्माणे प्राधान्यं दातुं अपि बलं दत्तवान्। एतदतिरिक्तं सः रणनीतिकदृष्ट्या महत्त्वपूर्णानां मार्गाणां विषये अपि चर्चां कृतवान्, येषां विषयः रक्षामन्त्रालयेन सह उत्थापितः अस्ति । एतेषु मार्गेषु शीघ्रं कार्यविधिं कर्तुं अपि सः आग्रहं कृतवान्। मुख्यमन्त्री राज्ये अधिकसङ्ख्यायां रज्जुमार्गपरियोजनानां अनुमोदनं कर्तुं अनुरोधं कृतवान् येन यातायातसमस्यायाः समाधानं भवति, जनानां लाभः च भवति। केन्द्रीयमन्त्री राज्याय सर्वसम्भवसहायतायाः आश्वासनं दत्त्वा अधिकारिभ्यः आवश्यकान् निर्देशान् दत्तवान्।

# मुख्यमंत्री सुक्खुः केन्द्रीयगृहमन्त्रिणं मिलित्वा आश्रयमापदण्डेषु ३० प्रतिशतं यावत् संशोधनं कर्तुं आग्रहं कृतवान्



हिमसंस्कृतवार्ताः - नवदेहली। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मंगलवासरे केन्द्रीयगृहमन्त्रिणम् अमितशाहं मिलित्वा राज्ये प्राकृतिकविपदः क्षतिविषये सूचनां दत्तवान्। सः अवदत् यत् राज्ये अद्यावधि प्रचण्डवृष्ट्या भूस्खलनेन च प्रायः एकसहस्रकोटिरूप्यकाणां हानिः अभवत्, यदा तु मानसूनस्य आरम्भः एव अभवत्। प्राकृतिकविपदां कारणेन बहवः जनाः प्राणान् त्यक्तवन्तः, मार्गाः, सेतवः, भवनानि, पेयजलं, सिञ्चनयोजनाः, विद्युत् आपूर्तिपरियोजनाः च महतीं क्षतिं प्राप्नुवन्ति। मुख्यमन्त्री आश्रय-पुनर्वासकार्याय उदारसहायतायै केन्द्रसर्वकाराद् आग्रहं कृतवान् । सः अवदत् यत् २०२३ वर्षात् आरभ्य राज्यं निरन्तरं प्राकृतिकविपदां सम्मुखीकरणं कुर्वन् अस्ति तथा च विगतत्रिषु वर्षेषु राज्यस्य प्रायः २१ सहस्रकोटिरूप्यकाणां हानिः अभवत्। मुख्यमंत्री सुक्खुः अमितशाहाय अवदत् यत् राज्यसर्वकारः राज्य आपदाश्रयकोषस्य, राष्ट्रिय-आपदाश्रयकोषस्य च माध्यमेन प्रभावितजनानाम् कृते आश्रयदानार्थं यथाशक्ति प्रयत्नः कुर्वन् अस्ति। सः अवदत् यत् नित्यं प्राकृतिकविपदः कारणात् राज्यस्य कृते पुनर्वासं पुनर्निर्माणं च कर्तुं, सीमितसम्पदां सह आधारभूतसंरचनानां पुनर्स्थापनं च अतीव कठिनं जातम्।
मुख्यमन्त्री उक्तवान् यत् राज्यस्य कठिनभौगोलिकपरिस्थितिं दृष्ट्वा केन्द्रसर्वकारेण आश्रयकार्यस्य पुनर्निर्माणकार्यस्य च मार्गदर्शिकाः अत्यल्पाः सन्ति। सः वर्तमानसीमायाः संशोधनं कृत्वा १० प्रतिशतात् ३० प्रतिशतं यावत् वर्धयितुं आग्रहं कृतवान्। एतेन राज्यस्य आश्रय-पुनर्निर्माण-कार्ये बहु साहाय्यं भविष्यति । अमितशाहः मुख्यमन्त्रिणं केन्द्रसर्वकारस्य पक्षतः हिमाचलप्रदेशाय सर्वं सम्भवं समर्थनं प्रदास्यति इति आश्वासनं दत्तवान्।

# सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं विकसितराष्ट्रस्य लक्ष्यं प्राप्तुं, राष्ट्रनिर्माणे च शिक्षायाः महती भूमिका भविष्यति - राष्ट्रपतिद्रौपदीमुर्मूः



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदीमुर्मुवर्या प्रोक्तवती यत् भारतस्य राष्ट्रियं लक्ष्यं वैश्विकमहाशक्तिः भवितुं वर्तते। सा अवदत् यत् भारतेन आधारभूतसंरचना, स्वास्थ्यसेवा, अन्तरिक्ष-विज्ञान-प्रौद्योगिकी-कृत्रिमबुद्धि चेत्यादिषु अनेकेषु क्षेत्रेषु सुदीर्घ-यात्रा कृता अस्ति । सा अवदत् यत् सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं विकसितराष्ट्रस्य लक्ष्यं प्राप्तुं, राष्ट्रनिर्माणे, भारतस्य भविष्यस्य स्वरूपनिर्माणे च शिक्षायाः महती भूमिका अवश्यमेव भविष्यति। रेवेन-शॉ-विश्वविद्यालयस्य त्रयोदश-तमे वार्षिकदीक्षान्तसमारोहे प्रवदन्ती राष्ट्रपतिमुर्मुवर्या प्रसन्नतां प्रकटितवती यत् अधिकांशविभागेषु बालिकाः शीर्षस्थानं प्राप्तवत्यः। अवधेयमस्ति यत् स्वस्य गृहराज्यस्य ओडिशायाः द्विदिवसीयायां यात्रायां राष्ट्रपतिवर्या रेवेनशॉ-बालिका-उच्चविद्यालयस्य त्रयाणां भवनानां पुनर्विकासस्य अपि आधारशिलाम् अस्थापयत् । सा कटकनगरे पञ्चदश-शताब्दौ प्रदुर्भूतस्य महान् ओडियाकवेः विदुषः च आदिकबी-सरलादास इत्यस्य जन्मजयन्ती-समारोहे भागं अभजत् तथा च चतुर्विंशत्यधिक-द्विसहस्रतम-वर्षस्य कलिंगरत्न-पुरस्कारम् केन्द्रीयमन्त्रिणे धर्मेन्द्रप्रधानाय प्रायच्छत् ।

# राजकीय- उच्च- विद्यालय- डांडा पागरे “एक पेड़ मां के नाम” इति अभियानस्य अंतर्गतं वृक्षारोपणं प्रारब्धम्



**हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः ।** राजकीय- उच्च- विद्यालय- डांडा पागरे “एक पेड़ मां के नाम” इति अभियानस्य अंतर्गतं इको क्लब, जूनियर रेडक्रॉस, स्काउट एंड गाइड यूनिट इत्येनैः मिलित्वा पादपानां संग्रहणं कृतम्। विद्यालयस्य मुख्याध्यापकः मङ्गलेश्वर गरनेरियामहोदयः सर्वेभ्यः छात्रेभ्यः निर्देशं दत्तवान् यत् ते एतान् वृक्षान् स्व स्व-कृषिक्षेत्रस्य रिक्तभूमौ रोपयन्तु येन वयं सर्वे सर्वकारस्य पर्यावरणसंरक्षण- अभियानस्य भागः भवितुम् अर्हति। इयं सूचना इको क्लब प्रभारी नीता चौहानः, (टीजीटी मेडिकल) दैनिकगतिविधिः प्रभारी दिनेशकुमार भार्गवः, (टीजीटी संस्कृतम्) पर्यावरणसंरक्षणं- संवर्धनं दृष्ट्या च महत्वपूर्णः सोपानः उक्तवन्तौ। अवधेयमस्ति यत् “एक पेड़ मां के नाम” इति अभियानं सर्वकारेण प्रारम्भितमस्ति। यस्यान्तर्गत राजकीय- उच्च- विद्यालय- डांडा- पागरे अस्य अनुपालना क्रियते।

# दिल्ली पब्लिक स्कूल-वाराणस्यां दशदिनात्मकं संस्कृतसंभाषणशिविरम् आरब्धम्



वाराणसी, 15 जुलै 2025 —अत्यन्तं हर्षस्य विषयः यः अस्मिन् दिवसे दिल्ली पब्लिक स्कूल-वाराणसी तथा काशीसंवादशाला इत्येतयोः संयुक्ततत्त्वावधानेन आयोज्यमानः दशदिनात्मकः संस्कृतसंभाषणशिविरः विद्यालये आरब्धः। अस्य कार्यक्रमस्य उद्घाटनं शैक्षणिकप्रमुखया श्रीमती रोली मानखंड-महाभ्यां दीपप्रज्वलनपूर्वकं कृतम्। तया छात्रान् संस्कृतभाषायाः महत्वं प्रति जागरूकत्वं च प्रेरितम्।श्रीमती सुनिपा सेनवाल-महाभिः पुष्पगुच्छं समर्प्य अतिथेः स्वागतं कृतम्।अतिथिरूपेण श्रीमती अञ्जलि सिंघानिया-महाभ्यः कार्यक्रमे सानंद सहभागीता कृतवत्यः।श्री काशीविश्वनाथेन कार्यक्रमस्य संचालनं मनोहररूपेण कृतम्।शिविरे प्रशिक्षकः डॉ. सदाशिव तिवारी महोदयः अध्यापनदायित्वं वहन् छात्रान् सरलतया संस्कृतसंवादे प्रेरयन् आसन्।एषः शिविरः १५ जुलैतः २४ जुलै २०२५ पर्यन्तं विद्यालयसमयस्य समाप्तेः अनन्तरं प्रतिदिनं आयोजितः भविष्यति। अत्र कक्षा ६तः १० पर्यन्तस्य छात्राः उत्साहेन भागं गृह्णन्ति।कार्यक्रमे छात्राणां सक्रियः सहभागः दृष्टिगोचरः जातः, यः तेषां संस्कृतभाषायाम् अभिवृद्धिं दर्शयति।विद्यालयस्य प्रधानाचार्यया श्रीमती मुनमुन सेनगुप्ता-महाभिः कार्यक्रमस्य प्रशंसा कृता। तया एषः शिविरः छात्राणां सर्वांगीणविकासस्य दिशायाम् एकं महत्वपूर्णं पथदर्शनमिति कथितम्।

## "लौकिकन्यायकोशः" "कुसुमस्तबकन्यायः"

पुष्पस्तबकस्य सामन्यतः वृत्तिद्वयं दृश्यते। देवतामूर्तेः उपरि, मनुष्याणां शरीरस्य उपरि किंवा शवस्य उपरि अथवा कुत्रचित् नाशः। स्वाभिमानिनः पुरुषा एवंविधा भवन्ति सर्वेषां मूर्ध्नि ते विराजन्ते अथवा अज्ञाताः एव नश्यन्ति। यथा-

"कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एवं वा।।

**(नीतिशतकम् ३३)**

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# “पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च” कार्यशालायाः समापनसमारोहः भव्यरूपेण सम्पन्नः

**हिमसंस्कृतवार्ता डॉ .निशिकान्तपाण्डेयः नलबारी, असमप्रदेशः।** कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयेन केन्द्रीयसंस्कृत-विश्वविद्यालयस्य सौजन्येन आयोज्यमाना “पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च” इत्यस्याः एकविंशतिदिनात्मिकायाः राष्ट्रियकार्यशालायाः समापनसमारोहः २०२५ तमे वर्षे जुलाईमासस्य त्रयोदशे दिने भव्यरूपेण सुष्ठुतया च सम्पन्नः। एषा कार्यशाला २३ जूनातदारभ्य १३ जुलाईपर्यन्तं निरन्तरं प्रवृत्ता आसीत्। अस्याम् कार्यशालायां देशस्य विविधप्रदेशेभ्यः समागताः छात्राः, शोधार्थिनः, अध्यापकवर्गश्च भागं गृहीतवन्तः। समापनसमारोहे प्रमुखकेन्द्ररूपेण विश्वविद्यालयस्य कुलपतिः प्रा. प्रह्लाद रा जोशीमहोदयः उपस्थितः। तेन संस्कृतभाषायाः पुनर्जीवनाय, प्राचीनपाण्डुलिपीनां संरक्षणाय च स्वप्रेरणादायकं भाषणं समर्पितम्। तेन उक्तं यत्, "पाण्डुलिपयः केवलं लेख्यरूपेण स्थिताः न भवन्ति, अपि तु तेषां मध्ये वर्तन्ते भारतस्य बौद्धिकवाङ्मयस्य गौरवकथाः। तासां संरक्षणम् अस्माकं परमकर्तव्यम्"इति। तत्रैव विशेषतिथिरूपेण आमन्त्रितः आसीत् केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्थः बौद्धविभागाध्यक्षः डॉ उत्तमसिंहः महोदयः। सः दिनत्रयं यावत् नागरीलिपेः प्रशिक्षणं दत्तवान्। सः समापनदिने पाण्डुलिपीनां लिप्यन्तरणे नागरीलिपेः प्रयोगः कथं सुलभः भवेत् इत्यस्य विश्लेषणात्मकं व्याख्यानं प्रस्तुतवान्। तदनन्तरम् आभासीयमाध्यमेन (Online माध्यमेन) सम्बद्धः आसीत् केन्द्रीयसंस्कृत-विश्वविद्यालयस्य संस्कृतज्ञानभारतस्य सम्योजकः डॉ डी देवनाथमहोदयः। तेन पाण्डुलिपिसम्पदायाः ऐतिहासिकम्, सांस्कृतिकं च मूल्यं विवेचितम्। विशेषतः, भारतस्य विविधदर्शनशास्त्राणां मूलग्रन्थाः ये पाण्डुलिपिरूपेण एव लभ्यन्ते, तेषां संरक्षणेन केवलं शास्त्रज्ञाना न रक्षन्ते, अपि तु अस्मदीया परम्परा अपि संवर्ध्यते इति तेन प्रदर्शितम्।कार्यक्रमे सर्वे प्रतिभागिनः स्वीयानुभवान् साभिनन्दनं प्रकट्य प्रस्तुतवन्तः। कश्चन प्रतिभागी उक्तवान् यत्, “एषा कार्यशाला केवलं शिक्षणमात्रं न आसीत्, अपि तु एका जीवन्-पाठशालारूपेण स्मरणीया अनुभवदात्री अभवत्।”तत्पश्चात् छात्रैः कार्यशालायां येन यत्किमपि अधीतम्, तस्य साररूपं प्रस्तुतीकरणं PPT द्वारा सम्यक्तया समर्पितम्। विभिन्नविषयेषु यथाः — शारदालिपेः अभ्यासः, ब्राह्मी-नागरीलिप्यादीनां तुलनात्मकम् अध्ययनम्, पाण्डुलिपिलक्षणम्, संरक्षणविधयः, इत्यादिषु विवेचनमकुर्वन्। समापनसमये सर्वे प्रतिभागिनः विश्वविद्यालयस्य पक्षतः प्रमाणपत्रैः समादृताः। केचन प्रतिभागिनः उत्तमप्रदर्शनार्थं विशेषपुरस्कारैः अपि सम्मानिताः। समारोहे सम्पूर्ण-कार्यक्रमस्य सुष्ठु-संचालनं विश्वविद्यालयस्य सर्वदर्शन-विभागाध्यक्षः डॉ रणजीत कुमार तिवारीमहोदयेन सम्पन्नम्।

# श्रीमद्भागवतप्रवचनम् -१०



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

सूतदेवः शौनकं प्रति कथयन् आसीत् यत् तत्समये नारदः अत्यन्तं चिन्तातुरः जातः, ततः सः बदरीवनं प्रति प्रस्थितः। ज्ञान-वैराग्ययोः जागरणार्थं तेन निश्चितं कृतं यत् 'अहं तपश्चरामि' इति। तस्मिन्नेव काले सः स्वस्य पुरतः कोटिशः सूर्यसमानान् तेजस्विनः सनकादिमुनीश्वरान् दृष्टवान्। तान् दृष्ट्वा नारदः एवं वक्तुम् आरभत।

नारदः अब्रवीत्- महात्मानः! अस्मिन् समये महता भाग्येन भवद्भिः सह मे सङ्गमः जातः। ममोपरि कृपां विधाय शीघ्रं हि भवद्भिः तत्साधनम् उच्यताम्। भवन्तः सर्वे अपि योगिनः, बुद्धिमन्तः एवं विद्वांसः सन्ति। भवन्तः पञ्चवर्षीयाः बालकाः इव दृश्यन्ते, चेदपि पूर्वजानामपि पूर्वजाः सन्ति। भवन्तः सदा वैकुण्ठधाम्नि निवसन्ति, निरन्तरं हरिकीर्तने हि तत्पराः सन्ति, भगवतः लीलामृतस्य रसास्वादनं कृत्वा तस्मिन्नेव उन्मत्ताः तिष्ठन्ति, एवञ्च एकमात्रं भगवत्कथा हि भवतां जीवनाधारः वर्तते। 'हरिः शरणम्' इतीदं वाक्यं सर्वदा भवतां मुखे वसति; तस्मात् कालप्रेरिता वृद्धावस्था अपि भवतः न कदापि बाधते। पूर्वस्मिन् काले भवतां भ्रूभङ्गमात्रेण भगवतः विष्णोः द्वारपालौ जयविजयौ सत्वरं भूमौ निपतितौ, तथा भवतां हि कृपया तौ पुनः वैकुण्ठलोकं प्रत्यागतौ। धन्याः भवन्तः! अहो भाग्यस्य योगेन भवताम् अत्र दर्शनं जातं मे। अहम् अत्यन्तं दीनोऽस्मि, तथा भवन्तः स्वभावेन हि दयापराः सन्ति; तस्मात् मयि दीने भवद्भिः दयापरैः अवश्यम् अनुग्रहः कर्तव्यः। उच्यताम्, आकाशवाणी यस्य विषये उक्तवती, तत् कीदृशं साधनं स्यात्, एवं मया केन प्रकारेण तस्य अनुष्ठानं करणीयम्? भवन्तः अस्मिन् विषये सविस्तरं वर्णयन्तु। भक्तिः, ज्ञानः, वैराग्यः च सुखं केन प्रकारेण प्राप्नुयुः? एवं केन विधिना एते प्रेमपूर्वकं सर्ववर्णेषु संस्थापयितुं शक्याः?ततः सनकादयः उक्तवन्तः- देवर्षे! त्वं चिन्तां मा कुरु, मनसा प्रसन्नः तिष्ठ; तेषाम् उद्धारस्य सरलोपायः पूर्वतः हि विद्यमानोऽस्ति। नारद! त्वं धन्योऽसि, विरक्तानां शिरोमणिः असि, एवं श्रीकृष्णदासानाम् अग्रणीः, शाश्वतमार्गप्रदर्शकश्च असि। भवान् भक्त्यर्थं यत् उद्योगं कुर्वन् अस्ति, तत् भवतः कृते न कोऽपि आश्चर्यकरः विषयः। भगवद्भक्तैः भक्तिः सम्यक्तया स्थापनीया इति तु समुचितमेव सदा। ऋषिभिः अनेके मार्गाः प्रकटीकृताः, ते सर्वे कष्टसाध्याः, स्वर्गफलप्रदाः च। इतः पर्यन्तं भगवत्प्राप्तिकरः मार्गस्तु गोप्यः हि वर्तते। तस्य मार्गस्य उपदेष्टा पुरुषस्तु प्रायः सौभाग्येन हि लभ्यते। सा आकाशवाणी भवदुदिश्य यद्वचनम् उक्तवती, यत् सत्कार्ययुक्तं साधनं सङ्केतवती च, तत् वयम् अवश्यमेव वदिष्यामः, भवान् प्रसन्नः तथा समाहितचित्तः सन् शृणोतु इति, शुभम्। (माहात्म्यम् -०२/४३-५८)

# भगवतः शिवस्य प्रियमासः श्रावणमासः

उत्तराखण्डराज्यस्य सन्दर्भे हरेला (पर्यावरणसंक्षणपर्व) महोत्सवस्य (संक्रान्तिः) आगमनेनेव पवित्रश्रावणमासस्य अपि आरम्भः भवति। अस्मिन् श्रावणमासे भगवतः शिवस्य पूजा अतीव सात्विकी, कामनापूर्तिदायिनी च अस्ति। श्रावणमासः "शिवस्य" कृते अतीव प्रियः यतः अस्मिन् मासे सः स्वशक्त्या सह संयोगं प्राप्य सम्पूर्णसृष्टिं सृजति।

## शिवः'- सर्वेषां संरक्षक देवः-

भारतीय परम्परायां शिवः परब्रह्मः, परमात्मा, रुद्रः, महादेव इत्यादिभिः नाम्भिः प्रसिद्धः अस्ति। 'शिव' शब्दस्य एकस्याः व्याख्यानुसारं शाश्वततापेन तृप्ताः भूत्वा यत्र प्राणिनः विश्रामार्थं स्वपिन्ते अथवा यस्मिन् जगति जगत् विनाशावस्थायां निद्रां करोति तत् 'शिव'- 'शेरते प्राणिन यात्रा स शिवः' इति उच्यते' अथवा 'शेते जगदस्मिन्निति शिवः'। भगवतः रामकृष्णश्च क्रमशः त्रेता-द्वापरायुगे दृश्यन्ते, परन्तु सृष्टेः आरम्भादेव प्रत्येकयुगे दरिद्राणां, दुर्बलानाम्, असहायानां, सर्वहाराणां च रक्षकः शिवः अस्ति।

## श्रावण शिव-शक्ति-कृपामास-

भारतीयपरम्परायां श्रावणमासः अतीव पवित्रः इति मन्यते। अयं मासः सम्पूर्णतया भगवते शिवाय समर्पितः अस्ति। अस्मिन् मासे शिवस्य विधिपूर्वकं पूजां कृत्वा मनुष्यः अपि शुभफलं प्राप्नोति। श्रावणमासस्य विशेषः महिमा अपि अस्ति यतोहि अस्मिन् मासे एव माँ भगवती पार्वती शिवं प्राप्तुं तीव्रं तपस्यां कृतवती आसीत् यथा तस्याः पतिः शिवः अपि अस्मिन् मासे प्रकटितः आसीत्। ततः प्रभृति श्रावण मासः शिवस्य तपस्यापूजां कृत्वा तस्य आशीर्वादप्राप्त्यर्थं विशेषः शुभमासः इति गण्यते। पुराणानुसारं भगवतः शिवस्य अभिषेकद्वारा, पूजनद्वारा, श्रावणमासे मन्त्रजपादधिकः परिणामः प्राप्यते।



शिवः शक्तिश्च विशेषतया सोमवासरे महादेवस्य पूजां कृत्वा प्रसन्नौ भवतः। तस्य प्रसादात् मनुष्यः दिव्य- शारीरिक- भौतिक- दुःखेभ्यः मुक्तिं प्राप्नोति। निर्धनाः धनं प्राप्नुवन्ति, अपुत्राः सन्ततिं प्राप्नुवन्ति, अविवाहिताः बालिकाः इष्टं वरं प्राप्नुवन्ति।

क्रमशः......



डॉ. सन्तोष कुमार काण्डपालः
मानिला, अल्मोड़ा, उत्तराखण्डः

# जीवित हुतात्मा– सदानन्दनमास्टरः

सकलं केरलराज्यं तं जानाति। उपनेत्रं धारयन्, षट्पादपर्यन्तं दीर्घः, द्विपञ्चाशत् पर्यन्तेऽपि दृढकायधारी सदानन्दनमास्टरः यदा तस्य शिष्येभ्यः इतिहासं सम्यगुपदिशति, तदा तमवलोक्य न ज्ञायते यत् तस्य द्वौ अपि पादौ जानुपर्यन्तं छिन्नौ स्तः। विंशतिवर्षात् परं सदानन्दनमास्टरः कृत्रिमपादाभ्यां विचरामः, किन्तु तस्य उत्साहे कर्मशक्तौ वा किञ्चिदपि अवरोधो न जातः। तस्य शिष्याः तं ‘माषे’ इति स्नेहेन आह्वयन्ति। अयं मास्टरः इतोऽपि छात्रेषु परमप्रियः अस्ति यत् तस्मिन्नेव कृते ते किमपि कर्तुं सज्जाः भवन्ति। १९९४ तमे वर्षे सदानन्दनमास्टरः जानुपर्यन्तं स्वपादौ नष्टवान्, तदा सः केवलं त्रिंशद्वर्षीयः आसीत्। न तु सः कदाचनापघातेन वा रोगेण बाधितः। अपि तु केरलस्य साम्यवादी अतिरेकी अत्यन्तक्रूरतया करवत्याः सहाय्येन तस्य पादौ छिन्नौ। मास्टरस्य दोषः केवलः एषः यत् साम्यवादपरंपरायाः कुले जातः अपि सन्, सः राष्ट्रवादीविचारान् स्वीकरोतुं धैर्यं कृतवान्। साम्यवादीपिता अपि पुत्रः संघविचारैः प्रभावितः इति सहनं न कर्तुं शक्ताः आसन्। कन्नूरजिलायाः मट्टनूरनगरे समीपे एका ग्रामे सदानन्दनमास्टरः जातः वर्धितश्च। तस्य पितरः साम्यवादीकार्यकर्ता आसीत्, भ्राता च साम्यवादीयुवाशाखायाः कार्ये लीनः आसीत्। कन्नूर नाम नगरं साम्यवादीविचारस्य केरलराज्ये मुख्यकेन्द्रम् आसीत्। अपि च, पिनरयि नाम गामः यत्र प्रथमं केरलराज्ये साम्यवादस्य प्रभावः सञ्जातः। अधुना केरलराज्यस्य मुख्यमंत्री पिनरयी विजयन अपि तस्मात् ग्रामात् जातः अस्ति, यस्य विरुद्धं राजकीयहिंसायाः अभियोगः अपि अस्ति। कन्नूरमध्ये अन्यविचाराणां प्रवेशः साम्यवादिनः न सहन्ते स्म। ये च राष्ट्रवादविचारं स्वीकुर्वन्ति, तान् प्रथमं सामाजिक- राजकीय- बहिष्कारं कुर्वन्ति, ततः तेषु विघ्नानि निर्माय हिंसया तान् निर्मूलयन्ति स्म। तथापि, प्रतिकूलस्थितौ अपि संघस्य कार्यम् आरब्धं जातम्। सदानन्दनमास्टरः तस्य प्रतीकं जातः।यदा मास्टरः महाविद्यालये पठन् आसीत् तदा SFI मध्ये कार्यं करोति स्म। परं शनैः सः अवगम्य अस्ति यत् साम्यवादेन भारतस्य समस्यासु समाधानं न दृश्यते। संघस्य राष्ट्रभक्तिपरं चिन्तनं, भारतमूलकं दृष्टिकोणं, स्वदेशे समस्यासु समाधानानामन्वेषणम्– एषां सर्वेषां प्रभावेण सः संघविचारं स्वीकरोतुं आरब्धवान्।

एकदा मास्टरः मित्रैः सह ग्रामे श्रमदानपूर्वकं एकं बसस्थानकं निर्मितवान्। तत् कम्युनिस्टैः मान्यं न कृतम्। ८ सितम्बर १९९३ तमे दिने कम्युनिस्टजनैः एकं पिधानं घोषितः। तस्मिन्नहनि दुष्टा आगत्य तत् बसस्थानकं ध्वस्तयितुम् आरब्धवन्तः। मास्टरः तत्र आगत्य तेषां प्रतिकारं कृतवान्। ततः प्रभृति मास्टरः कम्युनिस्टानां लक्ष्यं जातः।

२५ जनवरी १९९४ तमे दिवसे सायंकाले मास्टरः ग्रामे प्रत्यागतः। ते तं समीपे तस्य ग्रामे वर्तमाने बसस्थानके अपि प्रतीक्षां कृतवन्तः। ते जम्भयन् तं परिवृत्य, भूमौ अपातयन्। करवत्याः सहाय्येन तस्य द्वौ पादौ जानुपर्यन्तं छित्तवन्तः। तस्य गात्रे गोमयं योजितवन्तः, यत् शल्यक्रियया पुनः पादसंधानं न शक्येत। अर्धघण्टपर्यन्तं सः रक्तप्रवाहेण अचेतनः जातः। पश्चात् आरक्षकेन तं चिकित्सालयं नीतः। षण्णमासानन्तरं तस्य कृत्रिमपादः स्थाप्यते स्म। संघकार्यकर्तारः, परिवारः, च वनिता नाम्ना तस्य पत्न्याः अचलनिष्ठया सः पुनः मनोधैर्यं प्राप्तवान्। वनिता, यद्यपि मास्टरः पाङ्गुलः जातः, तेन विवाहं कर्तुं दृढनिश्चिता आसीत्। एषा तस्य जीवनस्य नूतनारम्भः आसीत्। अधुना वयस्य विंशतिवर्षेभ्यः परं सदानन्दनमास्टरः कृत्रिमपादेन जीवनं यापयति। शिक्षायां, संघकार्ये, राष्ट्रसेवायां च नित्यं तल्लीनः अस्ति। तस्य कन्या बी. टेक. अधीयते। कम्युनिस्टगुण्डैः कृतं हिंसात्मकं अपराधं सः क्षमितवान्। ये अपि तम्आक्रमितवन्तः तेऽपि आगत्य क्षमां याचितवन्तः। मास्टरः तेषां दोषं न मान्यते, अपि तु तस्य दोषः साम्यवादीदृष्टेः इति तस्य अभिप्रायः। अधुना केरलराज्ये पुनरपि हिंसायाः लहरी दृश्यते। अत एव, केरलमध्ये राष्ट्रवादविचारस्य मार्गे अतीव विघ्नानि सन्ति। तथापि, सदानन्दनमास्टरः विश्वासं करोति यत् राष्ट्रप्रेम, संघविचारः, च अस्मिन्नेव प्रदेशे उन्नतिं गमिष्यति। एषः देशः आदि शङ्कराचार्यस्य जन्मभूमिः अस्ति, अत्र राष्ट्रविचारस्य दीपः सततम् ज्वलति।

... सुधा साठये, मुंबई